PAPER - 5

# MT

2018 .... .... 1200

Seat No. | | | | | | | |

**MT - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - PRELIM - I PAPER - V**

**Time : 3 Hours** **(Pages 9)** **Marks : 80**

## प्रथमः विभागः - गद्यम् ।

**प्र.१. अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

प्रसन्नचित्तेन भगवता सुगतेन भिक्षवे नूतनचीवराणि दत्तानि यतः ........ ।

(भिक्षुणा भगवतः सुगतस्य सेवा कृता । / भिक्षुणा पुरातनचीवरस्य पूर्णतया उपयोगः कृतः।)

II) कः कं वदति । १

मम चीवराणि जीर्णानि ।

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

क्षुद्रवस्तुनः निर्माणे मानवीयपरिश्रमाणाम् आवश्यकता नैव वर्तते ।

एकदा कोऽपि भिक्षुः भगवन्तं प्रति जगाम । तं प्रणम्य अधोमुखः सोऽतिष्ठत् । भगवता पृष्टः सः अकथयत्, ''मम चीवराणि जीर्णानि अतः प्रार्थये ददातु मे नूतनचीवराणि ।'' ततः भगवता पृष्टं किं कृतं त्वया पुरातनचीवराणाम्? स प्रत्यवदत्, ''भगवन्, तत् चीवरं मया शयनीयरूपेणोपयोजितम्'' । भगवान् पप्रच्छ ''किं कृतं त्वया पुरातनशयनीयस्य।'' स उवाच अहं रात्रौ तद् उपधानरूपेण गृह्णामीति । तदाकर्ण्य कुतुहलेन भगवान् अवोचत्, ''वत्स ! कुत्रास्ति ते पुरातनमुपधानम् ।'' तदपि जीर्णं जातमतः मया तद् पादस्वच्छीकरणाय द्वारे पादपोशी इति स्थापितं तथा च पुरातनपादपोशिनः सूत्राणि दीपस्य कृते वर्तिरूपेण उपयुज्यन्ते मयेति प्रत्युवाच सः । तच्छ्रुत्वा प्रसन्नचित्तेन भगवता तस्मै नूतनचीवराणि दत्तानि। प्राचीनैषा कथा वस्तुवस्तुनः उपयोगः कथं करणीयः इति कथयति नः । क्षुद्रवस्तुनः निर्माणेऽपि नैसर्गिकसंसाधनं तथैव मानवीयपरिश्रमाणामावश्यकता विद्यते । चित्ताकर्षकं वस्तु क्रीत्वा पश्चाद् यदि न रोचते तर्हि सहजतया वयं बहिः त्यजामः ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) सन्धिविच्छेदं कुरुत । १

तदाकर्ण्य - ........ + ........ ।

II) पर्यायशब्दौ लिखत । १

१) उत्सुकतया - ........ । २) पुरातनम् - ........ ।

III) गद्यांशे आगते द्वे पूर्वकालवाचक त्वान्त - अव्यये लिखत । १

IV) विशेषणं लिखत । १

१) पादपोशिनम् ......... । २) कथा ......... ।

३. **स्वमतप्रकटनम् ।** २

जीर्णवस्त्राणाम् उपयोगः भवद्गृहे कथं क्रियते ?

**प्र.१. ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

१. **अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

लेरसिया आत्मानं रूपहीनं कृतवान् यतः ......... ।

(सः जनानां स्वभावं ज्ञातुम् इच्छति । / सः मनोरुग्णः आसीत् ।)

II) पूर्णवाक्येन उत्तरं लिखत । १

लेरसिया जनानां माहात्म्यं कथं निश्चिनोति स्म ?

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

ग्रामवासिभिः लेरसियासहिताः सर्वे जनाः भोजनार्थम् आहूताः ।

पुरा यदा मिझोजनाः गणान् कृत्वा वसन्तः तदा तेषामेकस्य गणस्य प्रमुख आसीत् लेरसियानामा। अतीव दयालुः स गणप्रमुखः सर्वैः सह समभावेन आचरति स्म । धनवत्तां दारिद्र्यं वागणयित्वा स जनानां सहृदयतया साधुतया वा तेषां माहात्म्यं निश्चिनोति स्म । कदाचित् सः स्वसहकारिभिः सह दूरवर्तिनं कञ्चन ग्रामं गतः । तत्पूर्वं कदापि स तत्र न गतवान् । ग्रामप्रवेशात् प्राक् लेरसिया आत्मानं कशाघातैः व्रणितं कृतवान् । कस्याश्चिदोषधेः अङ्गरसस्य विलेपनमपि स्वशरीरे तेन कृतं यतस्तस्य शरीरमुच्छूनं रूपहीनं रुग्णमिव च दीनं समजायत । तस्योपरि तेन मृत्तिकापि लिप्ता यतः स दीनतरोऽदृश्यत । तदनु स सहकारिभिः सह तद् ग्रामं प्रविश्य मध्यचतुष्पथं यातः । तत्र ते सर्वे मार्गे समुपाविशन् । तत्रस्था ग्रामवासिन एतावदेव जानन्ति यदागता जनाः ख्यातकीर्तेः लेरसियामहोदयस्य जनपदतः वर्तन्ते परं न कोऽपि जानाति स्म तेषु कतमः लेरसिया इति । लेरसियासहिता येऽन्ये जना आसन् ते ग्रामवासिभिर्जनैः स्वगृहं भोजनार्थमाहूताः । बहुना आतिथ्येन नृत्यगीतवादनैश्च सत्कृताः। परं लेरसिया न केनापि समाहूतः यतोऽतीव जुगुप्साकरमभद्रं च तस्य दर्शनम् । तेन न कोऽपि तं स्वगृहं नेतुं मनस्यकरोत् ।

२. **शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) सन्धिविग्रहं कुरुत । १

१) यतस्तस्य = ....... + ....... ।

२) येऽन्ये = ....... + ....... ।

II) विलोमपदं गद्यांशात् चित्वा लिखत । १

१) दारिद्र्यम् × ....... । २) अपमानिता × ....... ।

III) विशेषणे चित्वा लिखत । १

१) ........... दर्शनम् ।　　२) ........... गणस्य ।

IV) गद्यांशे आगते तृतीयाविभक्त्यन्तपदे लिखत । १

**३. पृथक्करणम् । यथाक्रमं घटनाः लिखत ।** २

i) स्वशरीरे मृत्तिकायाः लेपनम् ।

ii) सहकारिणां सत्कारः ।

iii) दूरवर्तिनं ग्रामं गमनम् ।

iv) ग्रामवासिभिः भोजनार्थं निमन्त्रणम् ।

**प्र.१. क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १

ऊर्जाविपत्तिः वर्धते यतः .......... । (ऊर्जासाधनानि मर्यादितानि / ऊर्जा त्वक्षया)

II) पूर्णवाक्येन उत्तरत । १

का नाम ऊर्जाविपत्तिः ?

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

ऊर्जा नाम कार्यशक्तिः ।

(अध्ययनकाले विद्युत्प्रवाहे खण्डिते एतादृशी चर्चा प्रारब्धा ।)

पार्थः - हन्त, वसन्तर्तौ परीक्षासमय एव भारनियमनं वर्तते । ऊर्जाविपत्तिस्तु वर्धत एव प्रतिदिनम् ।

अथर्वः - मया पठितम्, ननु ऊर्जा त्वक्षया । तत्कथमूर्जाविपत्तिः ?

श्रेया - सत्यम्, ऊर्जा त्वक्षया एव । परमूर्जासाधनानि तु मर्यादितान्येव । नष्टे कारणे कुतः कार्योत्पत्तिः ?

अथर्वः - परं का नाम ऊर्जा ? कानि तस्याः रूपाणि ?

श्रेया - ऊर्जा नाम कार्यशक्तिः । ऊष्मा, प्रकाशः, ध्वनिः, विद्युदादीनि बहूनि तस्याः रूपाणि।

पार्थः - परं कानि तस्याः साधनानि ?

श्रेया - पारम्परिकाणि अपारम्परिकाणि च तस्याः साधनानि । कृष्णाङ्गाराः, खनितैलं, नैसर्गिकवायुश्चेति पारम्परिकाणि। दशलक्षाधिकवर्षेभ्यः पूर्वं निर्जीवीभूताः प्राण्यंशाः सस्यांशाश्च मृत्तिकायाः महाशिलानां च बहुभारेणान्तः सम्पीडनाद् द्रववायुरूपं प्राप्नुवन्ति । तद् द्रवरूपेन्धनम् अपरिष्कृतं तैलमित्युच्यते । तदेव कृष्णसुवर्णमिति।

पार्थः - तस्योपस्कारार्थं महाप्रयासः आवश्यकः । भूमौ रन्ध्रं निर्माय निष्कास्य च तस्य संस्करणं क्रियते । तत्संस्करणाद् इन्धनतैलं, मृत्तैलं, स्वेदनतैलादिकं निष्पाद्यते । एतन्निसर्गाल्लभ्यते, तस्मात्तस्योपलब्धिः मर्यादिता ।

श्रेया - निसर्गात् प्राप्ता अपारम्परिकी ऊर्जा तु अमर्यादा भवति ।

पार्थः - सूर्यः, पवनः, जलमित्येतानि महाभूतानि । एतानि अपारम्परिकाणि ऊर्जासाधनानि अपि ऊर्जां निर्मातुं समर्थानि ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) रिक्तस्थानपूर्तिं कुरुत । १

१) विद्युदादीनि - ...... + ...... ।
(विद्युदा + आदीनि / विद्युत् + आदीनि / विद्युत् + दीनि)

२) ऊर्जाविपत्तिस्तु - ...... + ...... ।
(ऊर्जाविपत्ति + तु / ऊर्जाविपत्तिः + स्तु / ऊर्जाविपत्तिः + तु )

II) समूहेतरं पदं चिनुत । १

१) उन्नतिः, विकासः, प्रकाशः, प्रगतिः ।

२) दिनकरः, प्रभाकरः, सुखकरः, दिवाकरः ।

III) गद्यांशात् चित्वा विशेषणे लिखत । १
............. ऊर्जा । ............. रूपाणि ।

IV) गद्यांशे आगते सप्तम्यन्तपदे ........... ।, ........... । १

**३. पृथक्करणम् । (मञ्जूषातः शब्दान् चित्वा उचितस्तम्भे लिखत ।)** २

| पारम्परिकाणि ऊर्जासाधनानि । | अपारम्परिकाणि ऊर्जासाधनानि । |
|---|---|
| | |

( सूर्यः, खनितैलम्, कृष्णाङ्गाराः, जलम्, नैसर्गिकवायुः, पवनः )

**द्वितीयः विभागः - पद्यम् ।**

**प्र.२. अ) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

**१. पृथक्करणम् । (मञ्जूषातः शब्दान् चित्वा उचितस्तम्भे लिखत ।)** २

| अशक्यम् | शक्यम् |
|---|---|
| | |

(आकाशे चित्रकल्पना, अध्ययनेन विद्याप्राप्तिः, सिकताभिः सेतुनिर्माणम्, फलके चित्ररेखनम्)

ततोऽब्रवीत् तपोदत्तः सेतुः किं मूर्ख बध्यते ।
गङ्गायामोघहार्याभिः सिकताभिः कदाचन ॥१॥
तच्छ्रुत्वा तमुवाचैवं शक्रोऽथ द्विजरूपधृक् ।
यद्येवं वेत्सि तद् विद्यां विना पाठं विना श्रुतम् ॥२॥
कस्माद् व्रतोपवासादिभिस्त्वं साधयितुमुद्यतः ।
इयं शशविषाणेच्छा व्योम्नि वा चित्रकल्पना ॥३॥
अनक्षरो लिपिन्यासो यद् विद्याध्ययनं विना ।
एवं यदि भवेदेतन्नह्यधीयीत कश्चन ॥४॥

२. **स्पष्टीकरणम् ।**

'व्योम्नि चित्रकल्पना' अस्याः कल्पनायाः स्पष्टीकरणं माध्यमभाषया लिखत । २

**प्र.२. ब) पद्यांशौ पठित्वा निर्दिष्टे कृती कुरुत ।**

१. **शब्दज्ञानम् ।**

I) विलोमशब्दौ लिखत । १

१) उन्नतमुख × .......... । २) उपरि × ............... ।

II) द्वे विशेषणे लिखत । सुकृतिनः - .................... । १

कदर्थितस्यापि हि धैर्यवृत्ते -
र्न शक्यते धैर्यगुणः प्रमार्ष्टुम् ।
अधोमुखस्यापि कृतस्य वह्ने -
र्नाधः शिखा यान्ति कदाचिदेव ॥१॥
सदा सद्ग्रन्थानां श्रवणमनने ये विदधते ।
नयन्ते वा कालं कविकृतविनोदैः प्रमुदिताः ।
भ्रमं दूरीकुर्वन्ति च सदुपदेशेन कुधियां
स्वयं निर्भ्रान्तत्वात् प्रभुपदरतास्ते सुकृतिनः ॥२॥

२. **अन्वयपूर्तिः ।** २

कदर्थितस्य अपि धैर्यवृत्तेः (नरस्य) ....... प्रमार्ष्टुं ....... शक्यते । अधोमुखस्य कृतस्य अपि वह्नेः ....... कदाचित् एव ....... न यान्ति ।

**क) द्वे सुभाषिते शुद्धे पूर्णे च लिखत ।** ४

i) वंशभवो.............. महिमानम् ॥

ii) परोऽपि .............. ०मौषधम् ॥

iii) धर्मः .............. विपत् ॥

**ड) वृत्तनाम चिनुत ।** १

मूलं भुजङ्गैः शिखरं प्लवङ्गैः शाखा विहङ्गैः कुसुमानि भृङ्गैः।
नास्त्येव तच्चन्दनपादपस्य यन्नाश्रितं सत्वभरैः समन्तात् ॥

अस्य श्लोकस्य वृत्तनाम ............... इति ॥ (उपेन्द्रवज्रा / इन्द्रवज्रा / गीतिः)

**तृतीयः विभागः - स्थूलवाचनम् ।**

**प्र.३. अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

१. **अवबोधनम् ।**

I) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

वर्णविन्यासेन चित्रम् आकर्षकं दृश्यते ।

II) एकपदेन उत्तरं लिखत । १

चित्रकलायाः महत्त्वपूर्णः ग्रन्थः कः ?

'विष्णुधर्मोत्तरपुराणम्' इति अस्मिन् ग्रन्थे चित्रकलाशास्त्रं विस्तरेण वर्णितं विद्यते । 'मार्कण्डेय-वज्रसंवादः' तत्र प्रख्यातः । वज्रमहाराजेन, ''लोके-परलोके सुखसाधनं किम् इति' पृष्टे सति मार्कण्डेयमुनिः चित्रकलायाः श्रेष्ठत्वम् इत्थं उक्तवान्-

यथा सुमेरुः प्रवरो नगानां<br>
यथाण्डजानां गरुडः प्रधानः ।<br>
यथा नराणां प्रवरः क्षितीशः<br>
तथा कलानामिह चित्रकल्पः ॥

कलया न केवलं कलावताम् अपि तु सामान्यजनानाम् अपि सुखप्राप्तिः भवति ।

कलानां प्रवरं चित्रं धर्मकामार्थमोक्षदम् ।<br>
माङ्गल्यं प्रथमं चैतद् गृहे यत्र प्रतिष्ठितम् ॥

अस्याः चित्रकलायाः प्रवर्तकः आसीद् धर्मसुतः नारायणः यः देवानां शिल्पी । सामान्येन चित्ररेखाः, आकारः, प्रकाशच्छाया च प्राधान्यं वहन्ति । चित्रे सादृश्यकरणं प्रधानं परिकीर्तितम्। स्थानं, प्रमाणं, मधुरत्वं, भूलम्भः, विभक्तता, सादृश्यं, क्षयः तथैव वृद्धिरित्येते अष्टगुणाः चित्रे अनुस्यूताः भवेयुः । तैः चित्रस्य सौन्दर्यं वर्धते । चित्रकलायां वर्णविन्यासे एवं चित्रकारस्य परीक्षा भवति नैपुण्यमपि च आविष्कृतं भवति । श्वेतः, रक्तः, पीतः, कृष्णः, हरितश्चैते पञ्च प्रधानवर्णाः विदिताः । द्वित्राणां सम्मिश्रणेन अवान्तरवर्णानां संख्या अगणिता वर्तते । परं सम्मिश्रणार्थं श्यामगौरवर्णौ अतीव महत्त्वपूर्णौ । रङ्गव्यतिकरैः चित्रस्य शोभा वर्धते । परमस्मिन् विषये चित्रकारस्य कल्पकता एव आवश्यकी ।

२. **पृथक्करणम् ।** २

| | | | |
|---|---|---|---|
| i) नगश्रेष्ठः - | | ii) खगश्रेष्ठः - | |
| iii) नरप्रवरः - | | iv) श्रेष्ठकला - | |

## चतुर्थः विभागः - लेखनकौशल्यम् ।

**प्र.४. यथानिर्देशं कृतीः कुरुत । (केवलं ३ उपप्रश्नाः लेखनीयाः ।)**

अ) **कथापूर्तिः ।**

**मञ्जूषातः उचितशब्दान् चित्वा कथां पुनर्लिखत ।** ५

अस्ति हेमाङ्गदेशे राजपुरं नाम नगरम् । तत्र जीवंधरो नाम कोऽपि ....... राजपुत्रोऽभवत्। एकदा प्रवृत्ते मधुमासे जीवंधरकुमारः ....... सह जलक्रीडां कर्तुं नदीं गतः । तत्र आसन्नमरणः कोऽपि कुक्कुरः तस्य दृष्टिमागतः । केनापि निर्दयेन भृशं ताडितः सः रुधिरप्लावितः तत्र पतितः करुणम् आक्रोशति स्म । भूतानुकम्पी राजकुमारः बहु दुःखितः। तत्समीपम् ....... करतलेन परामृशन् करुणस्वरेण कुमारः अभाषत, 'भद्र केन निर्दयेन नराधमेन मारितोऽसि । भवतु यथाशक्ति लघूकरोमि ते दुःखम् । इत्युक्त्वा कुक्कुरं समाश्वासयितुं भृशं ....... । हस्तेन जलमानीय तमपाययत् । तथा च सानुक्रोशं भगवन्तं ....... तत्कर्णे मूलमन्त्रमुपदिष्टवान् । तस्य मन्त्रसामर्थ्येन स सारमेयः शान्तः सद्गतिं च गतः । अहो भूतदया महानुभावस्य ।

( प्रायतत, प्रार्थ्य, दयाशीलः, आगत्य, वयस्यैः )

**ब) ३ पर्यायेषु १ विषयम् अधिकृत्य पञ्चवाक्यात्मकं निबन्धं लिखत ।** ५

i) व्यायामस्य महत्त्वम् । ii) मैत्रीदिनोत्सवः । iii) जलमहिमा ।

**क) संस्कृतानुवादः ।**

**८ वाक्येषु ५ वाक्यानां संस्कृतभाषया अनुवादं कुरुत ।** ५

i) Peacock feather looks beautiful on the head of Lord Krishna.
ii) A cloth-bag is always with me.
iii) On 5th September teacher's day is celebrated.
iv) Now Railway reservation has become easy.
v) Delhi is the capital of India.
vi) Tell the story of evening jackal.
vii) Army chief arranges the army.
viii) Proper diet is essential for growth of the body.

**ड) वाक्यरचना ।**

i) धातूनां प्रयोगः - ४ धातुषु ३ धातून् प्रयुज्य ३ वाक्यानि संस्कृतभाषया लिखत । ३

१) दा (१ प.प.) २) वि + रम् (१ प.प.)
३) याच् (१ आ.प.) ४) वि + तॄ (१ प.प.)

ii) अशुद्धिसंशोधनम् - अव्ययानि प्रयुज्य रचितेषु ४ वाक्येषु २ वाक्ययोः अशुद्धिसंशोधनं कुरुत । २

१) पाठशालायां परितः क्रीडाङ्गणं वतते । २) राजानं नमः ।
३) चित्रपटगृहस्य निकषा विपणिः अस्ति । ४) मन्दिराय दूरे मम गृहं विद्यते ।

**पञ्चमः विभागः - व्याकरणम् - उपयोजनकौशल्यम् ।**

**प्र.५ यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)**

**अ) क्रियापदरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

**तृतीयपुरुष-एकवचनस्य रूपाणि लेखनीयानि ।**

| धातुः | द्वितीयः भविष्यकालः | परोक्षः भूतकालः | वर्तमानकालः | प्रथमः भूतकालः | आज्ञार्थः | विध्यर्थः |
|---|---|---|---|---|---|---|
| गम् १ प.प. | .......... | जगाम | ........ | अगच्छत् | ........ | ........ |
| कृ ८ आ.प. | .......... | चक्रे | ........ | ........ | कुरुताम् | ........ |

**ब) नाम-सर्वनामरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| सप्तमी | पयोमुचि | ...... | ...... |
| चतुर्थी | ...... | नामभ्याम् | ...... |
| षष्ठी | ...... | ...... | कासाम् |
| तृतीया | त्वया | ....... | ....... |

**क) धातुसाधित-विशेषणैः कोष्ठकपूर्तिं कुरुत । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| कर्मण भूतकालवाचक-धातुसाधित-विशेषणम् | कर्मणि विध्यर्थक-धातुसाधित-विशेषणम् | कर्तरि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्तरि वर्तमानकालवाचक-धातुसाधित-विशेषणम् |
|---|---|---|---|
| | | | |

(अभिलषन्, परिवेषितम्, कथयितव्यम्, विचरन्ती, प्रारब्धा, उक्तवान्, गम्यम्, पठितवती ।)

**ड) समासाः ।**

**समासपदानां समासनामभिः सह मेलनम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| | **विग्रहः** | **समासनाम** |
|---|---|---|
| i) | त्रिवर्णाः | इतरेतर द्वन्द्व समास |
| ii) | स्वेदबिन्दुभिः | बहुव्रीहि समास |
| iii) | व्रतोपवासादिभिः | मध्यमपदलोपी कर्मधारय समास |
| iv) | कविकृतः | नञ् बहुव्रीहि समास |
| v) | तृणस्थली | कर्मधारय समास |
| vi) | अधनौ | उपपद तत्पुरुष समास |
| vii) | महाविद्यालयः | षष्ठी तत्पुरुष समास |
| viii) | ग्रामस्थः | तृतीया तत्पुरुष समास |
| | | द्विगु समास |

**ढ) वाक्यपरिवर्तनम् । (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) दैवे दुर्बलतां गते तृणमपि प्रायेण वज्रायते । (सतिसप्तमीरचनां निष्कासयत ।)

ii) मेघः सन्देशम् अनयत् । (यक्षः) (प्रयोजकं कुरुत ।)

iii) जनाः सङ्गणकीयपत्रेण स्वसन्देशं प्रेषयन्ति । (प्रयोगं परिवर्तयत ।)

iv) भवान् अवधानं ददातु । (भवान् इत्यस्य स्थाने त्वम् उपयुज्य वाक्यं पुनर्लिखत ।)

**ण) सङ्ख्यावाचकाः । (रिक्तस्थानपूर्तिः ।) (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) अहं सप्ताहस्य ............... चित्रपटं पश्यामि । (once)

ii) महाभारतस्य ............... खण्डाः सन्ति । (11)

iii) ऑलिम्पिकस्पर्धायां दीपाकर्माकरमहोदयायाः ............... क्रमाङ्कः आसीत् । ($4^{th}$)

iv) इन्द्रचापे ............... वर्णाः सन्ति । (7)

**षष्ठः विभागः - अनुवादकौशल्यम् ।**

**प्र.६. अ) संस्कृतगद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

एकदा राजकुमारः सिद्धार्थः विहारार्थम् उपवनं गतः । बाणेन विद्धः एकः हंसः भूमौ पतितः आसीत् । एतद् दृष्ट्वा सिद्धार्थस्य चित्तं करुणया व्याकुलं जातम् । सः धावित्वा हंसस्य शरीराद् बाणं निष्कास्य तमङ्के अधारयत् । अत्रान्तरे देवदत्तः धावन् तत्र प्राप्तः । सिद्धार्थस्य हस्ते हंसं दृष्ट्वा सः उच्चैः अवदत्, ''सिद्धार्थ ! एषः हंसः मया बाणेन निपातितः, अतः मह्यं देहि ।'' सिद्धार्थः दृढतया अवदत्, ''अहं न दास्यामि । अहम् अस्य रक्षकोऽस्मि । राजा सर्वं वृत्तान्तमाकर्ण्य आदिशत्, ''यस्य समीपं हंसः गमिष्यति तस्यैव भविष्यति ।'' हंसः सिद्धार्थस्य समीपं गतवान् । सत्यमिदम् - भक्षकाद् रक्षकः श्रेयान् ।

**ब) संस्कृतपद्यांशौ पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

१) अतीतलाभस्य सुरक्षणार्थं भविष्यलाभस्य च सङ्गमार्थम् ।
आपत्प्रपन्नस्य मोक्षणार्थं यन्मन्त्र्यतेऽसौ परमो हि मन्त्रः ।।

२) शत्रुभावस्थितान् यस्तु करोति वशवर्तिनः ।
प्रज्ञाप्रयोगसामर्थ्यात् स शूरो स च पण्डितः ।।

**क) संस्कृतनाट्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

भरतः – अथ तुल्ये पुत्रविप्रवासे कथमहमरण्यं न प्रेषितः।
कैकेयी – जात ! मातुलकुले वर्तमानस्य प्रकृतिभूतस्ते विप्रवासः।
भरतः – अथ चतुर्दशवर्षाणि किं कारणमवेक्षितानि।
कैकेयी – जात ! चतुर्दश दिवसा इति वक्तुकामया पर्याकुलहृदयया चतुर्दशवर्षाणीत्युक्तम् ।
भरतः – अस्ति पाण्डित्यं सम्यग् विचारयितुम् ।

**Best of Luck**